श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे

# ॥ त्रयोविंशत्यधिकशततमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ त्रयोविंशत्यधिकशततमः सर्गः ॥

## अयोध्यां गच्छन् श्रीरामो सीतां मार्गस्थानान्यदर्शयत्

अनुज्ञातं तु रामेण तद् विमानमनुत्तमम्।
हंसयुक्तं महानादमुत्पपात विहायसम्॥ **6.123.1** ॥

पातयित्वा ततश्चक्षुः सर्वतो रघुनन्दनः।
अब्रवीन्मैथिलीं सीतां रामः शशिनिभाननाम्॥ **6.123.2** ॥

कैलासशिखराकारे त्रिकूटशिखरे स्थिताम्।
लङ्कामीक्षस्व वैदेहि निर्मितां विश्वकर्मणा॥ **6.123.3** ॥

एतदायोधनं पश्य मांसशोणितकर्दमम्।
हरीणां राक्षसानां च सीते विशसनं महत्॥ **6.123.4** ॥

एष दत्तवरः शेते प्रमाथी राक्षसेश्वरः।
तव हेतोर्विशालाक्षि निहतो रावणो मया॥ **6.123.5** ॥

कुम्भकर्णोऽत्र निहतः प्रहस्तश्च निशाचरः।
धूम्राक्षश्चात्र निहतो वानरेण हनूमता॥ **6.123.6** ॥

विद्युन्माली हतश्चात्र सुषेणेन महात्मना।
लक्ष्मणेनेन्द्रजिच्चात्र रावणिर्निहतो रणे॥ **6.123.7** ॥

अङ्गदेनात्र निहतो विकटो नाम राक्षसः।
विरूपाक्षश्च दुष्प्रेक्षो महापार्श्वमहोदरौ ॥ **6.123.8** ॥

अकम्पनश्च निहतो बलिनोऽन्ये च राक्षसाः।
त्रिशिराश्चातिकायश्च देवान्तकनरान्तकौ ॥ **6.123.9** ॥

युद्धोन्मत्तश्च मत्तश्च राक्षसप्रवरावुभौ।
निकुम्भश्चैव कुम्भश्च कुम्भकर्णात्मजौ बली ॥ **6.123.10** ॥

वज्रदंष्ट्रश्च दंष्ट्रश्च बहवो राक्षसा हताः।
मकराक्षश्च दुर्धर्षो मया युधि निपातितः ॥ **6.123.11** ॥

अकम्पनश्च निहतः शोणिताक्षश्च वीर्यवान्।
यूपाक्षश्च प्रजङ्घश्च निहतौ तु महाहवे ॥ **6.123.12** ॥

विद्युज्जिह्वोऽत्र निहतो राक्षसो भीमदर्शनः।
यज्ञशत्रुश्च निहतः सुप्तघ्नश्च महाबलः ॥ **6.123.13** ॥

सूर्यशत्रुश्च निहतो ब्रह्मशत्रुस्तथापरः।
अत्र मन्दोदरी नाम भार्या तं पर्यदेवयत् ॥ **6.123.14** ॥

सपत्नीनां सहस्रेण साग्रेण परिवारिता।
एतत् तु दृश्यते तीर्थं समुद्रस्य वरानने ॥ **6.123.15** ॥

यत्र सागरमुत्तीर्य तां रात्रिमुषिता वयम्।
एष सेतुर्मया बद्धः सागरे लवणार्णवे ॥ **6.123.16** ॥

तव हेतोर्विशालाक्षि नलसेतुः सुदुष्करः।
पश्य सागरमक्षोभ्यं वैदेहि वरुणालयम् ॥ **6.123.17** ॥

अपारमिव गर्जन्तं शङ्खशुक्तिसमाकुलम्।
हिरण्यनाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि ॥ **6.123.18** ॥

विश्रमार्थं हनुमतो भित्त्वा सागरमुत्थितम्।
एतत् कुक्षौ समुद्रस्य स्कन्धावारनिवेशनम्॥ **6.123.19** ॥

अत्र पूर्वं महादेवः प्रसादमकरोद् विभुः।
एतत् तु दृश्यते तीर्थं सागरस्य महात्मनः॥ **6.123.20** ॥

सेतुबन्ध इति ख्यातं त्रैलोक्येन च पूजितम्।
एतत् पवित्रं परमं महापातकनाशनम्॥ **6.123.21** ॥

अत्र राक्षसराजोऽयमाजगाम विभीषणः।
एषा सा दृश्यते सीते किष्किन्धा चित्रकानना॥ **6.123.22** ॥

सुग्रीवस्य पुरी रम्या यत्र वाली मया हतः।
अथ दृष्ट्वा पुरीं सीता किष्किन्धां वालिपालिताम्॥ **6.123.23** ॥

अब्रवीत् प्रश्रितं वाक्यं रामं प्रणयसाध्वसा।
सुग्रीवप्रियभार्याभिस्ताराप्रमुखतो नृप॥ **6.123.24** ॥

अन्येषां वानरेन्द्राणां स्त्रीभिः परिवृता ह्यहम्।
गन्तुमिच्छे सहायोध्यां राजधानीं त्वया सह॥ **6.123.25** ॥

एवमुक्तोऽथ वैदेह्या राघवः प्रत्युवाच ताम्।
एवमस्त्विति किष्किन्धां प्राप्य संस्थाप्य राघवः॥ **6.123.26** ॥

विमानं प्रेक्ष्य सुग्रीवं वाक्यमेतदुवाच ह।
ब्रूहि वानरशार्दूल सर्वान् वानरपुङ्गवान्॥ **6.123.27** ॥

स्त्रीभिः परिवृताः सर्वे ह्ययोध्यां यान्तु सीतया।
तथा त्वमपि सर्वाभिः स्त्रीभिः सह महाबल॥ **6.123.28** ॥

अभित्वरय सुग्रीव गच्छामः प्लवगाधिप।
एवमुक्तस्तु सुग्रीवो रामेणामिततेजसा॥ **6.123.29** ॥

वानराधिपतिः श्रीमांस्तैश्च सर्वैः समावृतः।
प्रविश्यान्तःपुरं शीघ्रं तारामुद्वीक्ष्य सोऽब्रवीत्॥ **6.123.30** ॥

प्रिये त्वं सह नारीभिर्वानराणां महात्मनाम्।
राघवेणाभ्यनुज्ञाता मैथिलीप्रियकाम्यया॥ **6.123.31** ॥

त्वर त्वमभिगच्छामो गृह्य वानरयोषितः।
अयोध्यां दर्शयिष्यामः सर्वा दशरथस्त्रियः॥ **6.123.32** ॥

सुग्रीवस्य वचः श्रुत्वा तारा सर्वाङ्गशोभना।
आहूय चाब्रवीत् सर्वा वानराणां तु योषितः॥ **6.123.33** ॥

सुग्रीवेणाभ्यनुज्ञाता गन्तुं सर्वैश्च वानरैः।
मम चापि प्रियं कार्यमयोध्यादर्शनेन च॥ **6.123.34** ॥

प्रवेशं चैव रामस्य पौरजानपदैः सह।
विभूतिं चैव सर्वासां स्त्रीणां दशरथस्य च॥ **6.123.35** ॥

तारया चाभ्यनुज्ञाताः सर्वा वानरयोषितः।
नेपथ्यविधिपूर्वं तु कृत्वा चापि प्रदक्षिणम्॥ **6.123.36** ॥

अध्यारोहन् विमानं तत् सीतादर्शनकाङ्क्षया।
ताभिः सहोत्थितं शीघ्रं विमानं प्रेक्ष्य राघवः॥ **6.123.37** ॥

ऋष्यमूकसमीपे तु वैदेहीं पुनरब्रवीत्।
दृश्यतेऽसौ महान् सीते सविद्युदिव तोयदः॥ **6.123.38** ॥

ऋष्यमूको गिरिवरः काञ्चनैर्धातुभिर्वृतः।
अत्राहं वानरेन्द्रेण सुग्रीवेण समागतः॥ **6.123.39** ॥

समयश्च कृतः सीते वधार्थं वालिनो मया।
एषा सा दृश्यते पम्पा नलिनी चित्रकानना॥ **6.123.40** ॥

त्वया विहीनो यत्राहं विललाप सुदुःखितः।
अस्यास्तीरे मया दृष्टा शबरी धर्मचारिणी॥ **6.123.41** ॥

अत्र योजनबाहुश्च कबन्धो निहतो मया।
दृश्यतेऽसौ जनस्थाने श्रीमान् सीते वनस्पतिः॥ **6.123.42** ॥

जटायुश्च महातेजास्तव हेतोर्विलासिनि।
रावणेन हतो यत्र पक्षिणां प्रवरो बली॥ **6.123.43** ॥

खरश्च निहतो यत्र दूषणश्च निपातितः।
त्रिशिराश्च महावीर्यो मया बाणैरजिह्मगैः॥ **6.123.44** ॥

एतत् तदाश्रमपदमस्माकं वरवर्णिनि।
पर्णशाला तथा चित्रा दृश्यते शुभदर्शने॥ **6.123.45** ॥

यत्र त्वं राक्षसेन्द्रेण रावणेन हृता बलात्।
एषा गोदावरी रम्या प्रसन्नसलिला शुभा॥ **6.123.46** ॥

अगस्त्यस्याश्रमश्चैव दृश्यते कदलीवृतः।
दीप्तश्चैवाश्रमो ह्येष सुतीक्ष्णस्य महात्मनः॥ **6.123.47** ॥

दृश्यते चैव वैदेहि शरभङ्गाश्रमो महान्।
उपयातः सहस्राक्षो यत्र शक्रः पुरन्दरः॥ **6.123.48** ॥

अस्मिन् देशे महाकायो विराधो निहतो मया।
एते ते तापसा देवि दृश्यन्ते तनुमध्यमे॥ **6.123.49** ॥

अत्रिः कुलपतिर्यत्र सूर्यवैश्वानरोपमः।
अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी॥ **6.123.50** ॥

असौ सुतनु शैलेन्द्रश्चित्रकूटः प्रकाशते।
अत्र मां कैकयीपुत्रः प्रसादयितुमागतः॥ **6.123.51** ॥

एषा सा यमुना रम्या दृश्यते चित्रकानना।
भरद्वाजाश्रमः श्रीमान् दृश्यते चैष मैथिलि ॥ **6.123.52** ॥

इयं च दृश्यते गङ्गा पुण्या त्रिपथगा नदी।
नानाद्विजगणाकीर्णा सम्प्रपुष्पितकानना ॥ **6.123.53** ॥

शृङ्गवेरपुरं चैतद् गुहो यत्र सखा मम।
एषा सा दृश्यते सीते सरयूर्यूपमालिनी ॥ **6.123.54** ॥

एषा सा दृश्यते सीते राजधानी पितुर्मम।
अयोध्यां कुरु वैदेहि प्रणामं पुनरागता ॥ **6.123.55** ॥

ततस्ते वानराः सर्वे राक्षसाः सविभीषणाः।
उत्पत्योत्पत्य संहृष्टास्तां पुरीं ददृशुस्तदा ॥ **6.123.56** ॥

ततस्तु तां पाण्डुरहर्म्यमालिनीं
विशालकक्ष्यां गजवाजिभिर्वृताम्।
पुरीमपश्यन् प्लवगाः सराक्षसाः
पुरीं महेन्द्रस्य यथामरावतीम् ॥ **6.123.57** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये युद्धकाण्डे
त्रयोविंशत्यधिकशततमः सर्गः ॥